# রেণুকাস্তোত্রম্

{॥ রেণুকাস্তোত্রম্ ॥}

শ্রীগণেশায নমঃ ।

পাকামৃতাংশুমকুটাভরণা ভবানী

শোকাপহা নতজনস্য শুভাখিলাঙ্গী ।

কোকাকৃতিস্তনভরা কুশলানি নিত্যং

মূকাম্বিকা মম তনোতু মুনীন্দ্রবন্দ্যা ॥

শ্লোকস্যাদ্যন্তযোর্বাগ্ভবমুচ্চার্য পঠেদিতি সম্প্রদাযঃ ॥ ওঁ॥

কালাগ্ন্যাদি শিবাবসানমখিলং তে গুল্ফদঘ্নং শিবে

মূর্তিং কীর্তযিতুং ন কস্য রসনা লজ্জাম্বুধৌ মজ্জতি ।

তস্মাত্ ত্বচ্চরণৈকদেশনখরজ্যোতিঃস্ফুলিঙ্গা ইব

স্ফূর্জন্তি প্রভবিষ্ণবশ্চ সততং তে পদ্মনাভাদযঃ ॥ ১॥

কল্পঃ কোঽপি স শাম্ভবো বিজযতে মাতস্ত্বযা কল্পিতো

যত্রানল্পবিকল্পজালবিমুখঃ কশ্চিদ্বিপশ্চিত্ পরঃ ।

সা ত্বং সত্ত্ববতামপীহ সুলভা নৈবাসি কিং স্তূযসে

স্বচ্ছন্দং শিশবো যথা তব পুনঃ ক্রীডন্তি বেদা ইমে ॥ ২॥

লীলাচামরধারিণীসহচরীগত্যা মহাসিদ্ধযো

নূনং বঞ্চযিতুং স্ফুরন্তি ভবতীকারুণ্যশূন্যং জনম্ ।

Stotram Digitalized By Sanskritdocuments.org

অম্ব ত্বন্নয়নাঞ্চলং করুণয়া যস্মিন্ পরিক্রীডতে
তস্য দ্বারি নিবারিতোঽপি কুরুতে সেবাং সুরাণাং গণঃ ॥ ৩॥

আ পাতালতলাত্ ফণীশ্বরশিরোরত্নাংশুনীরাজিতা-
দা সর্বজ্ঞনিকেতনাদপি শিখাযৌতাংশুধৌতাঙ্কণাত্ ।
একচ্ছত্রমবাপ্য বৈভবমহো দীব্যন্তি তে সন্ততং
যে সন্ধ্যাচলনিশ্চলং তব পদং ধ্যায়ন্তি গায়ন্তি চ ॥ ৪॥

যে ত্বামম্ব পলাশবিল্বকুসুমৈরুল্লাসিভির্মল্লিকা-
পুষ্পৈর্বা বনমল্লিকাবিরচিতৈরুদ্দামভির্দামভিঃ ।
মুগ্ধোন্মীলিতমালতীভিরভিতঃ সম্পূজয়ন্ত্যাদরাত্
তেষামুদ্ধৃতসৌরভা প্রতিদিনং ব্যাজৃম্ভতে ভারতী ॥ ৫॥

ত্বাং সহ্যাচলমৌলিসুস্থিতপদাং শ্রী-একবীরাম্বিকে
যে লিম্পন্তি সচন্দ্রচন্দনরসৈস্তেষাং সুধাস্রাবিণী ।
বাণীবিস্ময়বর্ণ্যমানগিরিশব্যালোলগঙ্গাজল-
স্বচ্ছন্দোর্মিপরম্পরাবিজয়িনী বাণী নরীনৃত্যতি ॥ ৬॥

যে ত্বাং ব্রাহ্মমুহূর্তনির্মলধিয়স্ত্বাধারতশ্চিন্তয়-
ন্ত্যূর্ধ্বং মূর্ধ্নি সরোরুহেঽতিধবলে পীযূষধারাবৃতে ।
তে মৃত্যুং সহসা বিজিত্য রচয়ন্ত্যুচ্চৈর্গতিং নিত্যশঃ
প্রত্যাদিষ্টপুরঃসুধাকরসুধাহস্তাবসন্তাবিতাঃ ॥ ৭॥

যস্ত্বাং পশ্যতি তস্য নশ্যতি মহাপাপান্ধকারঃ ক্ষণাত্
কিং চার্ধাদপরে পুরাণপুরুষপ্রাণপ্রিয়ে পার্বতি ।
মূর্ধ্নস্তস্য ততো ভবেত্ কৃতধিয়ঃ শ্রী-একবীরাম্বিকে
দৃশ্যন্তে ন মনাগপীহ যদিয়ং প্রত্যক্ষমুদ্যোতসে ॥ ৮॥

কিং যোগেন কিমর্চনেন কিমথ জ্ঞানেন কিং কর্মণা
কিং ধ্যানেন কিমিজ্যয়া কিমথবা দানেন কিং দীক্ষয়া ।
দৃশ্যন্তে যদি সহ্যশৈলশিখরশ্রীগর্বিতাঃ সর্বদা
মাতঃ পার্বতি রেণুকে তব পদাম্ভোজপ্রভাবিভ্রমাঃ ॥ ৯॥

হে সহ্যাচলনিত্যকেলিরসিকে কর্পূরকস্তূরিকা-
বিন্যস্তাগরুকুঙ্কুমৈর্মলযজৈস্ত্বং চর্চিতাভ্যর্চিতা ।
তে দীব্যন্তি সুরেন্দ্রমুখ্যবিবুধশ্রেণীকিরীটস্ফুর-
ন্মাণিক্যপ্রতিবিম্বিতারুণপদস্থাঃ সম্প্রদাঃ সম্পদাম্ ॥ ১০॥

হে সহ্যাদ্রিবিনিদ্রলিঙ্গবপুষি শ্রী-একবীরাম্বিকে
ত্বাং কৃষ্ণাগরুগুগ্গুলুপ্রভৃতিভির্যে ধূপযন্ত্যাদরাত্ ।
তে কৈলাসনিবাসিনীভিরভিতঃ সঞ্চারিতৈশ্চারুভি-
র্লীলাচামরমারুতৈশ্চিরতরং নন্দন্তি রুদ্রা ইব ॥ ১১॥

মাতঃ শাম্ভবি জৃম্ভিতামৃতশিলালিঙ্গাত্মিকে রেণুকে
ত্বাং সহ্যাদ্রিশিরোবিহারসুলভাং নীরাজযন্ত্যাদরাত্ ।

তে বৃন্দারকবৃন্দবন্দিতপদাশ্চন্দ্রার্কচূডামণি-

জ্যোতির্মেদুরমন্দিরাঙ্কণভুবো ভূতিং লভন্তেঽদ্ভুতাম্ ॥ ১২॥

দূরাদঙ্গণরঙ্গসঙ্গতরজোরাজীবিরাজদ্বপু-

স্তুভ্যং যঃ প্রণিপত্তিমম্ব কুরুতে কশ্চিত্ কদাচিত্ ক্বচিত্ ।

সম্প্রাপ্য শ্রিযমিন্দুসুন্দরযশঃসন্দোহনিষ্যন্দিনী-

মন্তে নির্বিষযং স্বযং প্রবিশতি শ্রীশাম্ভবং বৈভবম্ ॥ ১৩॥

ত্বামুদ্দিশ্য কদাপি কোঽপি কিমপি ক্বাপি প্রপদ্যন্ নরো

ভক্ত্যাবেশবশীকৃতো জপতি বা যো যজ্জুহোত্যাদরাত্ ।

তত্ তস্যাক্ষযমেব দেবি ভবতি স্বর্গাপবর্গপ্রদং

ত্বন্নামস্মরণং গতো বিজযতে সর্বোঽপি শর্বো জনঃ ॥ ১৪॥

মাতস্ত্বচ্চরণেন যাস্যতি চিরং রুদ্রোঽপি ভদ্রাশয-

শ্চূডাচন্দ্রকলামরীচিনিচযৈরাচান্তরত্নাসনৈঃ ।

তত্ত্বানামুপরি স্থিতো বিজযতে বামাদিভির্নামভিঃ

শ্রীকামেশ্বরি দক্ষপুত্রি গিরিজে ত্বং রেণুকে রক্ষ মাম্ ॥ ১৫॥

মাতর্ভৈরবি ভর্গপত্নি গিরিজে গাযত্রি গোত্রাত্মিকে

দুর্গে গৌরি সরস্বতি ত্রিণযনে শ্রীসিদ্ধলক্ষ্মী ধৃতে ।

নিত্যে মৃত্যুবিকারহারিণি শিবে শ্রী-একবীরাম্বিকে

সোঽহং তে শরণাগতঃ করুণযা ত্বং রেণুকে রক্ষ মাম্ ॥ ১৬॥

ইতি শ্রীরেণুকাস্তোত্রং সমাপ্তঃ ॥

পাকামৃতাংশুমকুটাভরণা ভবানী

শোকাপহা নতজনস্য শুভাখিলাঙ্গী ।

কোকাকৃতিস্তনভরা কুশলানি নিত্যং

মূকাম্বিকা মম তনোতু মুনীন্দ্রবন্দ্যা ॥

শ্লোকস্যাদ্যন্তযোর্বাণ্ভবমুচ্চার্য পঠেদিতি সম্প্রদাযঃ ॥ ওঁ॥

Encoded and proofread by Sridhar Seshagiri sridhar.seshagiri at gmail.com

Reencoded independently by Kaushal S. Kaloo kaushalskaloo at gmail.com

From Stotrasamuccaya, A Collection of Rare and Unpublished Stotras, Vol 1,

Ed.

Pandit K. Parameshwara Aithal, Introduction by Dr. V. Raghavan, Adyar Library

Center, 1969

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Renuka Stotram 1 ( By Vishnu Das ) Lyrics in Bengali PDF
% File name : reNukAstotram.itx
% Location : doc_devii
% Author : Vishnudas

% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com, Kaushal S. Kaloo kaushalskaloo at gmail.com
% Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com
% Description-comments : reNukAstotram from stotrasamuccaya Aithal 1969
% Latest update : June 22, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website